# Savitri or Gayatri Panjarastotram 1

# સાવિત્રીપઞ્જરસ્તોત્રમ્ અથવા ગાયત્રીપઞ્જરસ્તોત્રમ્ ૧

## Document Information


Text title : Savitri or Gayatri Panjarastotram 1

File name : sAvitrIpanjarastotram.itx

Category : devii, gAyatrI, panjara, devI

Location : doc_devii

Transliterated by : NA

Proofread by : PSA Easwaran

Latest update : March 24, 2017

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


September 25, 2024

*sanskritdocuments.org*

# સાવિત્રીપઞ્જરસ્તોત્રમ્ અથવા ગાયત્રીપઞ્જરસ્તોત્રમ્ ૧

શ્રીગણેશાય નમઃ ॥

ભગવન્તં દેવદેવં બ્રહ્માણં પરમેષ્ઠિનમ્ ।
વિધાતારં વિશ્વસૃજં પદ્મયોનિં પ્રજાપતિમ્ ॥ ૧॥

શુદ્ધસ્ફટિકસઙ્કાશં મહેન્દ્રશિખરોપમમ્ ।
બદ્ધપિઙ્ગજટાજૂટં તડિત્કનકકુણ્ડલમ્ ॥ ૨॥

શરચ્ચન્દ્રાભવદનં સ્ફુરદિન્દીવરેક્ષણમ્ ।
હિરણ્મયં વિશ્વરૂપમુપવીતાજિનાવૃતમ્ ॥ ૩॥

મૌક્તિકાભાક્ષવલયસ્તન્ત્રીલયસમન્વિતઃ ।
કર્પૂરોદ્ધૂલિતતનુઃ સ્રષ્ટુર્નયનવર્ધનમ્ ॥ ૪॥

વિનયેનોપસઙ્ગમ્ય શિરસા પ્રણિપત્ય ચ ।
નારદઃ પરિપપ્રચ્છ દેવર્ષિગણમધ્યગઃ ॥ ૫॥

નારદ ઉવાચ ।
ભગવન્ દેવદેવેશ સર્વજ્ઞ કરુણાનિધે ।
શ્રોતુમિચ્છામિ પ્રશ્નેન ભોગમોક્ષૈકસાધનમ્ ॥ ૬॥

ઐશ્વર્યસ્ય સમગ્રસ્ય ફલદં દ્વન્દ્વવર્જિતમ્ ।
બ્રહ્મહત્યાદિપાપઘ્નં પાપાઘરિભયાપહમ્ ॥ ૭॥

યદેકં નિષ્કલં સૂક્ષ્મં નિરઞ્જનમનામયમ્ ।
યત્તે પ્રિયતમં લોકે તન્મે બ્રૂહિ પિતર્મમ ॥ ૮॥

બ્રહ્મોવાચ ।
શ‍ૃણુ નારદ વક્ષ્યમિ બ્રહ્મમૂલં સનાતનમ્ ।
સૃષ્ટ્યાદૌ મન્મુખે ક્ષિપ્તં દેવદેવેન વિષ્ણુના ॥ ૯॥

પ્રપઞ્ચબીજમિત્યાહુરુત્પત્તિસ્થિતિહેતુકમ્ ।

પુરા મયા તુ કથિતં કશ્યપાય સુધીમતે ॥ ૧૦॥

સાવિત્રીપઞ્જરં નામ રહસ્યં નિગમત્રયે ।
ઋષ્યાદિકં ચ દિગ્વર્ણં સાઙ્ગાવરણકં ક્રમાત્ ॥ ૧૧॥

વાહનાયુધમન્ત્રાસ્ત્રં મૂર્તિધ્યાનસમન્વિતમ્ ।
સ્તોત્રં શ◌ૃણુ પ્રવક્ષ્યામિ તવ સ્નેહાચ્ચ નારદ ॥ ૧૨॥

બ્રહ્મનિષ્ઠાય દેયં સ્યાદદેયં યસ્ય કસ્યચિત્ ।
આચમ્ય નિયતઃ પશ્ચાદાત્મધ્યાનપુરઃસરમ્ ॥ ૧૩॥

ઓમિત્યાદૌ વિચિન્ત્યાથ વ્યોમહૈમાબ્જસંસ્થિતમ્ ।
ધર્મકન્દગતજ્ઞાનમૈશ્વર્યાષ્ટદલાન્વિતમ્ ॥ ૧૪॥

વૈરાગ્યકર્ણિકાઽઽસીનાં પ્રણવગ્રહમધ્યગામ્ ।
બ્રહ્મવેદિસમાયુક્તાં ચૈતન્યપુરમધ્યગામ્ ॥ ૧૫॥

તત્ત્વહંસસમાકીર્ણાં શબ્દપીઠે સુસંસ્થિતામ્ ।
નાદબિન્દુકલાતીતાં ગોપુરૈરુપશોભિતામ્ ॥ ૧૬॥

વિદ્યાવિદ્યામૃતત્વાદિપ્રકારૈરભિસંવૃતામ્ ।
નિગમાર્ગલસઞ્છન્નાં નિર્ગુણદ્વારવાટિકામ્ ॥ ૧૭॥

ચતુર્વર્ગફલોપેતાં મહાકલ્પવનૈવૃતામ્ ।
સાદ્રાનન્દસુધાસિન્ધુનિગમદ્વારવાટિકામ્ ॥ ૧૮॥

ધ્યાનધારણયોગાદિતૃણગુલ્મલતાવૃતામ્ ।
સદસચ્ચિત્સ્વરૂપાખ્યાં મૃગપક્ષિસમાકુલામ્ ।
વિદ્યાવિદ્યાવિચારત્વાલ્લોકાલોકાચલાવૃતામ્ ॥ ૧૯॥

અવિકારસમાશ્લિષ્ટનિજધ્યાનગુણાવૃતામ્ ।
પઞ્ચીકરણપઞ્ચોત્થભૂતતત્ત્વનિવેદિતામ્ ॥ ૨૦॥

વેદોપનિષદર્થાખ્યદેવર્ષિગણસેવિતામ્ ।
ઇતિહાસગ્રહગણૈઃ સદારૈરભિવન્દિતામ્ ॥ ૨૧॥

ગાથાપ્સરોભિર્યક્ષૈશ્ચ ગણકિન્નરસેવિતામ્ ।
નારસિંહપુરાણાખ્યૈઃ પુરુષૈઃ કલ્પચારણૈઃ ॥ ૨૨॥

કૃતગાનવિનોદાદિકથાલાપનતત્પરામ્ ।
તદિત્યવાઙ્મનોગમ્યતેજોરૂપધરાં પરામ્ ॥ ૨૩॥

જગતઃ પ્રસવિત્રીં તાં સવિતુઃ સૃષ્ટિકારિણીમ્ ।
વરેણ્યમિત્યન્નમયીં પુરુષાર્થફલપ્રદામ્ ॥ ૨૪॥

અવિદ્યાવર્ણવર્જ્યાં ચ તેજોવદ્ગર્ભસંજ્ઞિકામ્ ।
દેવસ્ય સચ્ચિદાનન્દપરબ્રહ્મરસાત્મિકામ્ ॥ ૨૫॥

ધીમહ્યહં સ વૈ તદ્વદ્બ્રહ્માદ્વૈતસ્વરૂપિણીમ્ ।
ધિયો યો નસ્તુ સવિતા પ્રચોદયાદુપાસિતામ્ ॥ ૨૬॥

પરોઽસૌ સવિતા સાક્ષાદેનોનિર્હરણાય ચ ।
પરો રજસ ઇત્યાદિ પરં બ્રહ્મ સનાતનમ્ ॥ ૨૭॥

આપો જ્યોતિરિતિ દ્વાભ્યાં પાઞ્ચભૌતિકસંજ્ઞકમ્ ।
રસોઽમૃતં બ્રહ્મપદૈસ્તાં નિત્યાં તપિનીં પરામ્ ॥ ૨૮॥

ભૂર્ભુવઃસુવરિત્યેતૈર્નિગમત્વપ્રકાશિકામ્ ।
મહર્જનસ્તપઃસત્યલોકોપરિસુસંસ્થિતામ્ ॥ ૨૯॥

તાદૃગસ્યા વિરાડ્રૂપકિરીટવરરાજિતામ્ ।
વ્યોમકેશાલકાકાશરહસ્યં પ્રવદામ્યહમ્ ॥ ૩૦॥

મેઘભ્રુકુટિકાક્રાન્તવિધિવિષ્ણુશિવાર્ચિતામ્ ।
ગુરુભાર્ગવકર્ણાન્તાં સોમસૂર્યાગ્નિલોચનામ્ ॥ ૩૧॥

ઇડાપિઙ્ગલસૂક્ષ્માભ્યાં વાયુનાસાપુટાન્વિતામ્ ।
સન્ધ્યાદ્વિરોષ્ઠપુટિતાં લસદ્વાગ્ભૂપજિહ્વિકામ્ ॥ ૩૨॥

સન્ધ્યાસૌ દ્યુમણેઃ કણ્ઠલસદ્બાહુસમન્વિતામ્ ।
પર્જન્યહૃદયાસક્તવસુસુસ્તનમણ્ડલામ્ ॥ ૩૩॥

આકાશોદરવિત્રસ્તનાભ્યવાન્તરદેશકામ્ ।
પ્રજાપત્યાખ્યજઘનાં કટીન્દ્રાણીતિ સંજ્ઞિકામ્ ॥ ૩૪॥

ઊરૂ મલયમેરુભ્યાં શોભમાનાસુરદ્વિષમ્ ।
જાનુની જહ્નુકુશિકવૈશ્વદેવસદાભુજામ્ ॥ ૩૫॥

અયનદ્વયજઙ્ઘાદ્યખુરાદ્યપિતૃસંજ્ઞિકામ્ ।
પદાઙ્ઘ્રિનખરોમાદ્યભૂતલદ્રુમલાઞ્છિતામ્ ॥ ૩૬॥

ગ્રહરાશ્યૃક્ષદેવર્ષિમૂર્તિં ચ પરસંજ્ઞિકામ્ ।

તિથિમાસર્તુવર્ષાખ્યસુકેતુનિમિષાત્મિકામ્ ॥ ૩૭॥

અહોરાત્રાર્ધમાસાખ્યાં સૂર્યાચન્દ્રમસાત્મિકામ્ ।
માયાકલ્પિતવૈચિત્ર્યસન્ધ્યાચ્છાદનસંવૃતામ્ ॥ ૩૮॥

જ્વલત્કાલાનલપ્રખ્યાં તડિત્કોટિસમપ્રભામ્ ।
કોટિસૂર્યપ્રતીકાશાં ચન્દ્રકોટિસુશીતલામ્ ॥ ૩૯॥

સુધામણ્ડલમધ્યસ્થાં સાન્દ્રાનન્દામૃતાત્મિકામ્ ।
પ્રાગતીતાં મનોરમ્યાં વરદાં વેદમાતરમ્ ॥ ૪૦॥

ચરાચરમયીં નિત્યાં બ્રહ્માક્ષરસમન્વિતામ્ ।
ધ્યાત્વા સ્વાત્મનિ ભેદેન બ્રહ્મપઞ્જરમારભેત્ ॥ ૪૧॥

પઞ્જરસ્ય ઋષિશ્ચાહં છન્દો વિકૃતિરુચ્યતે ।
દેવતા ચ પરો હંસઃ પરબ્રહ્માધિદેવતા ॥ ૪૨॥

પ્રણવો બીજશક્તિઃ સ્યાદોં કીલકમુદાહૃતમ્ ।
તત્તત્ત્વં ધીમહિ ક્ષેત્રં ધિયોઽસ્ત્રં યઃ પરં પદમ્ ॥ ૪૩॥

મન્ત્રમાપો જ્યોતિરિતિ યોનિર્હંસઃ સબન્ધકમ્ ।
વિનિયોગસ્તુ સિદ્ધ્યર્થં પુરુષાર્થચતુષ્ટયે ॥ ૪૪॥

તતસ્તૈરઙ્ગષટ્કં સ્યાત્તૈરેવ વ્યાપકત્રયમ્ ।
પૂર્વોક્તદેવતાં ધ્યાયેત્ સાકારગુણસંયુતામ્ ॥ ૪૫॥

પઞ્ચવક્ત્રાં દશભુજાં ત્રિપઞ્ચનયનૈર્યુતામ્ ।
મુક્તાવિદ્રુમસૌવર્ણાં સિતશુભ્રસમાનનામ્ ॥ ૪૬॥

વાણીં પરાં રમાં માયાં ચામરૈર્દર્પણૈર્યુતામ્ ।
ષડઙ્ગદેવતામન્ત્રૈ રૂપાદ્યવયવાત્મિકામ્ ॥ ૪૭॥

મૃગેન્દ્રમૃગપક્ષીન્દ્રમૃગહંસાસને સ્થિતામ્ ।
અર્ધેન્દુબદ્ધમુકુટકિરીટમણિકુણ્ડલામ્ ॥ ૪૮॥

રત્નતાટઙ્કમાઙ્ગલ્યપરગ્રૈવેયનૂપુરામ્ ।
અઙ્ગુલીયકકેયૂરકઙ્કણાદ્યૈરલઙ્કૃતામ્ ॥ ૪૯॥

દિવ્યસ્રગ્વસ્ત્રસઞ્છન્નરવિમણ્ડલમધ્યગામ્ ।
વરાભયાબ્જયુગલાં શઙ્ખચક્રગદાઙ્કુશાન્ ॥ ૫૦॥

શુભ્રં કપાલં દધતીં વહન્તીમક્ષમાલિકામ્ ।
ગાયત્રીં વરદાં દેવીં સાવિત્રીં વેદમાતરમ્ ॥ ૫૧॥

આદિત્યપથગામિન્યાં સ્મરેદ્બ્રહ્મસ્વરૂપિણીમ્ ।
વિચિત્રમન્ત્રજનનીં સ્મરેદ્વિદ્યાં સરસ્વતીમ્ ॥ ૫૨॥

ત્રિપદા ઋઙ્મયી પૂર્વામુખી બ્રહ્માસ્ત્રસંજ્ઞિકા ।
ચતુર્વિંશતિતત્ત્વાખ્યા પાતુ પ્રાચીં દિશં મમ ॥ ૫૩॥

ચતુષ્પાદયજુર્બ્રહ્મદણ્ડાખ્યા પાતુ દક્ષિણામ્ ।
ષટ્ત્રિશત્તત્ત્વયુક્તા સા પાતુ મે દક્ષિણાં દિશમ્ ॥ ૫૪॥

પ્રત્યઙ્મુખી પઞ્ચપદી પઞ્ચાશત્તત્ત્વરૂપિણી ।
પાતુ પ્રતીચીમનિશં સામબ્રહ્મશિરોઽઙ્કિતા ॥ ૫૫॥

સૌમ્યા બ્રહ્મસ્વરૂપાખ્યા સાથર્વાઙ્ગિરસાત્મિકા ।
ઉદીચીં ષટ્પદા પાતુ ચતુઃષષ્ટિકલાત્મિકા ॥ ૫૬॥

પઞ્ચાશત્તત્ત્વરચિતા ભવપાદા શતાક્ષરી ।
વ્યોમાખ્યા પાતુ મે ચોર્ધ્વાં દિશં વેદાઙ્ગસંસ્થિતા ॥ ૫૭॥

વિદ્યુન્નિભા બ્રહ્મસંજ્ઞા મૃગારૂઢા ચતુર્ભુજા ।
ચાપેષુચર્માસિધરા પાતુ મે પાવકીં દિશમ્ ॥ ૫૮॥

બ્રાહ્મી કુમારી ગાયત્રી રક્તાઙ્ગી હંસવાહિની ।
બિભ્રત્કમણ્ડલ્વક્ષસ્રક્સ્રુવાન્મે પાતુ નૈરૃતીમ્ ॥ ૫૯॥

ચતુર્ભુજા વેદમાતા શુક્લાઙ્ગી વૃષવાહિની ।
વરાભયકપાલાક્ષસ્રગ્વિણી પાતુ વારુણીમ્ ॥ ૬૦॥

શ્યામા સરસ્વતી વૃદ્ધા વૈષ્ણવી ગરુડાસના ।
શઙ્ખારાબ્જાભયકરા પાતુ શૈવીં દિશં મમ ॥ ૬૧॥

ચતુર્ભુજા વેદમાતા ગૌરાઙ્ગી સિંહવાહના ।
વરાભયાબ્જયુગલૈર્ભુજૈઃ પાત્વધરાં દિશમ્ ॥ ૬૨॥

તત્તત્પાર્શ્વસ્થિતાઃ સ્વસ્વવાહનાયુધભૂષણાઃ ।
સ્વસ્વદિક્ષુ સ્થિતાઃ પાન્તુ ગ્રહશક્ત્યઙ્ગદેવતાઃ ॥ ૬૩॥

મન્ત્રાધિદેવતારૂપા મુદ્રાધિષ્ઠાન દેવતા ।
વ્યાપકત્વેન પાત્વસ્માનાપહૃત્તલમસ્તકી ॥ ૬૪॥

તત્પદં મે શિરઃ પાતુ ભાલં મે સવિતુઃપદમ્ ।
વરેણ્યં મે દૃશૌ પાતુ શ્રુતીર્ભર્ગઃ સદા મમ ॥ ૬૫॥

ઘ્રાણં દેવસ્ય મે પાતુ પાતુ ધીમહિ મે મુખમ્ ।
જિહ્વા મમ ધિયઃ પાતુ કણ્ઠં મે પાતુ યઃપદમ્ ॥ ૬૬॥

નઃપદં પાતુ મે સ્કન્ધૌ ભુજૌ પાતુ પ્રચોદયાત્ ।
કરૌ મે ચ પરઃ પાતુ પાદૌ મે રજસેઽવતુ ॥ ૬૭॥

અસૌ મે હૃદયં પાતુ મમ મધ્યં સદાવતુ ।
ૐ મે નાભિં સદા પાતુ કટિં મે પાતુ મે સદા ।
ઓમાપઃ સક્થિની પાતુ ગુહ્યં જ્યોતિઃ સદા મમ ॥ ૬૮॥

ઊરૂ મમ રસઃ પાતુ જાનુની અમૃતં મમ ।
જઙ્ઘે બ્રહ્મપદં પાતુ ગુલ્ફૌ ભૂઃ પાતુ મે સદા ॥ ૬૯॥

પાદૌ મમ ભુવઃ પાતુ સુવઃ પાત્વખિલં વપુઃ ।
રોમાણિ મે મહઃ પાતુ રોમકં પાતુ મે જનઃ ॥ ૭૦॥

પ્રાણાંશ્ચ ધાતુતત્ત્વાનિ તદીશઃ પાતુ મે તપઃ ।
સત્યં પાતુ મમાયૂંષિ હંસો શુદ્ધિં ચ પાતુ મે ॥ ૭૧॥

શુચિવત્ પાતુ મે શુક્રં વસુઃ પાતુ શ્રિયં મમ ।
મતિં પાત્વન્તરિક્ષં સદ્ધોતા દાનં ચ પાતુ મે ॥ ૭૨॥

વેદિષત્ પાતુ મે વિદ્યામતિથિઃ પાતુ મે ગૃહમ્ ।
ધર્મં દુરોણસત્ પાતુ નૃષત્ પાતુ સુતાન્મમ ॥ ૭૩॥

વરસત્ પાતુ મે ભાર્યાં મૃતસત્ પાતુ મે સુતાન્ ।
વ્યોમસત્પાતુ મે બન્ધૂન્ ભ્રાતૃનબ્જાશ્ચ પાતુ મે ॥ ૭૪॥

પશૂન્મે પાતુ ગોજાશ્ચ ઋતજાઃ પાતુ મે ભવમ્ ।
સર્વં મે અદ્રિજાઃ પાતુ યાનં મે પાત્વૃતં સદા ॥ ૭૫॥

અનુક્તમથ યત્સ્થાનં શરીરેઽન્તર્બહિશ્ચ યત્ ।
તત્સર્વં પાતુ મે નિત્યં હંસઃ સોઽહમહર્નિશમ્ ॥ ૭૬॥

ઇદં તુ કથિતં સમ્યઙ્ મયા તે બ્રહ્મપઞ્જરમ્ ।
સન્ધ્યયોઃ પ્રત્યહં ભક્ત્યા જપકાલે વિશેષતઃ ॥ ૭૭॥

ધારયેદ્વિજવર્યો યઃ શ્રાવયેદ્વા સમાહિતઃ ।
સ વિષ્ણુઃ સ શિવઃ સોઽહં સોઽક્ષરઃ સ વિરાટ્ સ્વરાટ્ ॥ ૭૮॥

ઇતિ વસિષ્ઠસંહિતાયાં બ્રહ્મનારદસંવાદે સાવિત્રીપઞ્જરસ્તોત્રં
અથવા ગાયત્રીપઞ્જરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*Savitri or Gayatri Panjarastotram 1*

pdf was typeset on September 25, 2024

Please send corrections to *sanskrit@cheerful.com*